नमस्तस्येकस्येचित्॥ ॥अथअप्पदीक्षितविरचितंवृत्तिवार्तिकंप्रारभ्यते॥ ॥विश्वंप्रकाशयंतीभ्या
पारैर्लक्षणादिभिर्ध्वननैः॥ नयनैरिवहरमूर्तिर्विबुधोपास्यासरस्वतीजयति॥१॥ इत्तयःकासारणाव
लकारंधृभिः॥ अभिधालक्षणाव्यक्तिरितितस्रोनिरूपिताःतत्रकचित्कचिद्दृस्थैर्विशषानस्फुटीकृतान्॥
निगद्यितुमस्माभिःक्रियतेवृत्तिवार्तिकं॥२॥ शक्त्याप्रतिपादकत्वमभिधा॥ सात्रिविधा॥रूढिर्योगोयो
गरूढिश्च॥ अखंडशक्तिमात्रेणैकार्थप्रतिपादकत्वंतन्मात्रेणप्रतिपादकत्वंचावयवार्थाप्रतिभासाद्वा-
तत्प्रतिभासेपितस्यप्रतिपाद्येबाधाद्वा॥ यथा॥ यत्तेपदांबुरुहमंबुरुहासनेड्यधन्याःप्रपद्यसकृदीशभ
वंतिमुक्ताः॥ नित्यंतदेवभजतामतिमुक्तलक्ष्मीर्युक्तेवमणिनूपुरमौक्तिकानां॥ अत्रमणिनूपुरादिशब्दा
नांनावयवार्थाप्रतिभासः॥ अतिमुक्तशब्दस्यावयवार्थेप्रतिभासेपिवासंतीलक्षणेप्रतिपाद्येतस्यबाध
इत्येषारूढिः॥ यद्यप्यतिमुक्तलक्ष्मीर्वासंतीमुकुलशोभेवमुक्तातिशायिनीसम्यदित्यभेदाध्यवसेयमति
मुक्तशब्दस्यावयवार्थोविवक्षितस्तथापिवासंतीगतत्वेनाप्रतिपादनात्तत्ररूढिरेव॥ एतद्व्याप्तिवारणे-
नैवलक्षणेकपरमर्थवत्॥ अवयवशक्तिमात्रसापेक्षंपदस्यैकार्थप्रतिपादत्वंयोगः॥ ऊर्ध्वविरंचिभव-
नात्तवनाभिपद्माद्रोमावलीयदजुषस्तमसःपुरस्तात्॥ मुक्तावमंडितमुरस्थलमुन्मयूखंपश्यामिदेवप
रमंपरमेवसाक्षात्॥ अत्रविरिंचिभवनंनाभिपद्मंरोमावलीइत्यादिशब्दानांयोगः॥ अवयवशक्तिमात्रेण
प्रतिपादकत्वमपिसमुदायार्थप्रतिभासाद्वातत्प्रतिभासेपितस्यावयवशक्तिप्रतिपाद्येनन्वयाद्वेतिद्वेद्धा
॥तत्राद्यमुदाहृतं॥ द्वितीयंयथा॥ अस्तुत्रयीमयतनुस्तवलंबनालीरत्नेस्तथापिपरिभूयतएवभानुः॥ सोढः
सतांबतनिशांतमुपागतानामेवंतिरस्कृतिकृदीश्वरकः सुहृत्तेः॥ अत्रनिशांतशब्दस्यनिकेतनरूपसमुदा
यार्थप्रतिभासेपिनिशांतंक्रियाभावसानमुपागतानांसतांनक्षत्राणांतिरस्कृतिकृदंतर्हितकृदेवंगृहंप्राप्ता
नांसत्पुरुषाणांपराभवकृदितोभेदाध्यवसायार्थंतत्तस्यविवक्षितत्वेक्रियाभावसानयोगएव॥ अवयव

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

समुदायोभयशक्तिसापेक्षमेकार्थप्रतिपादकत्वंयोगरूढिः यथा पङ्कजादयः कृशिमपोषविभाव्यमानचांद्राय
णव्रतनिषेवणएवनित्यं कुर्वन्प्रदक्षिणमुपेक्षसुरालयांतेऽजिघृक्षुर्मुखांबुरुचिमेषतपस्यतीन्दुः अत्रसुरा
लयशब्दसुराणामालयइत्येवयवशक्त्यासमुदायशक्त्याचकनकाचलेयोगरूढिः नचास्यशब्दस्यक-
नकाचलेरूढिरेवकेवलास्तुभाभृतयोगरूढिः उदाहृतश्लोकेतपश्चर्योत्प्रेक्षायाः प्रदक्षिणीक्रियामार्गेण
स्वकनकाचलस्यावयवशक्त्योपस्थाप्यदेवालयाभेदाध्यवसायेनापिनिर्वाहादितिवाच्यं तत्रैवावयव-
वार्थसंभवेभ्यायभेदव्यवसायरूपपरामर्शनिरीक्षणायोगात् तत्रैवयोगिकार्थप्रतिभासस्यसर्वसाक्षि
त्वाच्च नचैवंसतिदेवागारसाधारणछन्नावयवशक्तिमात्रेणांकनकाचलेप्रवृत्त्युपपत्तेर्नतत्रसमुदायश
क्तिःकल्पनीयेत्यपिशंक्यं रत्नसानुःसुरालयइत्यभिधानकोशस्मृतिपरंपरयाविशिष्यतस्यतत्रसमु
दायशक्तेरपिसिद्धेः अन्यथादेवागारइवतत्रविशिष्यानुशासनानपेक्षणेतद्वैयर्थ्यापत्तेः अतएवतां
दृशपदेसतिपुनःसमुदायार्थवाचकपदयोगेपुनरुक्तदोषोल्लासः यथा भद्रायभवतुभवतांभगवान्
भजमानदेह्यतिरविः दिवसारंभविकस्वरनीरजरजनाभिरामतरनयनः यत्रयोगरूढिमतोपिपदस्यो
वयवार्थशक्तिमूलप्रतीयमानार्थगर्भीकारेणनत्रैवविश्रांतिः तत्रसमुदायार्थवाचकपदांतरप्रयो
गेपिनपुनरुक्तदोषोल्लासः यथा उद्यन्मृगाङ्करुचिकंदलकोमलानामुन्निद्रेणेननलिनोदरसोदरा-
णां प्रासुंतथाधररुचामवलोकनेननालंसहस्रनयनः सदृपापिदृक्षिं अत्रसहस्रनयनशब्दस्यावय
वार्थशक्त्यावलोकनप्रकर्षसंभवप्रतीतेस्तत्रैवतस्यविश्रांतिरितिपुनरिंद्रादिपदप्रयोगः यथावा
तवप्रसादात्कुसुमायुधोपिसहायमेकंमधुमेवलब्ध्वा कुर्याहरस्यापिपिनाकपाणेर्धैर्यच्युतिंकममधान्विनोन्ये अ-
त्रपिनाकपाणिशब्दस्यशिवनाम्नोवयवार्थशक्त्यातदायुधसारत्वप्रतीतावपिकामधादिपदांतरंनोपात्तमितितत्रतत्राप्यु
गः कुसुमायुधोपीत्यत्रावयवार्थशक्त्यातदायुधसारत्वप्रतीतावपिकामधादिपदांतरंनोपात्तमितितत्रतत्राप्यु ॥१॥

तपुरुषाश्लिष्टमाहंपदस्यविशेषणानिः सत्तारहितसाहित्यचिंतामपिकारः वस्तुतस्तुनायंनियमः पदत्वयावार्थश-
क्तिमूलप्रतीयमानार्थविवक्षायांसमुदायार्थवाचिपदांतरंप्रयोक्तव्यमिति किंत्वयमपिप्रकारोस्तीत्युदाहृतं तद-
प्रयोगोयथा मन्येनिजस्खलनदोषमवर्जनीयमन्यस्यमूर्ध्निविनिवेश्यबहिर्भुजाग्रेषु आविश्यदेवरसनानिमहाक
वीनांदेवीगिरामपितवस्तवमातनोतु अत्रवागीश्वरपदावयवार्थशक्त्याप्रतीयमानस्यविद्याविषयेखनित्यांप-
वादमितरवत्सरस्वतीनसहतइत्यवाच्यापरकारकतयाविवक्षितत्वेपिवाचामधिदेवतापियत्रभगवतः रूपीस्वे
नपर्याप्तिंसामर्थ्यंबिभर्त्तितत्रकथमन्येधिकुर्युरित्यर्थापत्त्यलंकारध्वननसत्वेपिनपृथक्सरस्वतीवाचकपदप्रयो
गः एकावलीरूतापिविशिष्यसाभिप्रायत्वंसपरिकारालंकारलक्षणमभिधाय नरसिंहमहीपालकीर्तिस्त्रिप
थगातव नकस्यभवतिश्लाघ्यापुमानाभुवनत्रयमितितदुदाहरणेभुवनत्रयपवित्रीकरणोपपत्त्यभिप्रायगर्भत्रि
पथगापदविशेष्यमेवप्रयुंजानेनतत्प्रयोगाप्रयोगाभ्यांहेत्वध्यमेवादृतंनपुनस्तत्प्रयोगनियमः क्वचिद्योगरू
ढिमतः पदस्यविषयविशेषेवयवार्थानन्वयात्समुदायार्थमात्रेणैवविश्रांतिः यथा उल्लासस्मृतत्युदरबंधनि
बद्धदिव्यशोणाश्मरश्मिकलिकावलिरच्युतेषा आगाम्यानेकशातकल्पविधातृगर्भनाभ्युद्गतांबुरुहनुज्वलपं-
कशोभां अत्रांबुरुहपदस्यभगवन्नाभिपद्मेवयवार्थानन्वयाद्रूढिरेव क्वचिच्चसमुदायार्थानन्वयादवयवा
र्थमात्रेतस्यविश्रांतिः यथा कल्हारकैरवमुखेष्वपिपंकजेषुलोकेशपत्कमलमेवतथाप्रसिद्धं मन्येभिजात
भवदान्यतुभास्यनेतिमर्मप्रकाशानामिदंविधिनेवछद्मनं अत्रपंकजपदस्यकुमुदकल्हारादिषुसमुदायार्था
नन्वयाद्योगएव नेयायिकास्तुपंकजशब्दरूपेपंकपदोपादानरूपयांतरंगप्रत्यासत्त्यानाभिकमलकुमुदा
द्यन्वयात्प्रागेवपंकजनिकर्तृत्ववैशिष्ट्येनोपस्थितपद्मत्वस्यपंकजनिकर्तृत्वस्यचनाभिकमलकुमुदाद्यन्व
येनाकांक्षानवाविशिष्टस्यतदन्वयविषयिणीशाब्दधीरितितदन्वयार्थंस्वतंत्रपद्मत्वपंकजनिकर्तृत्वोपस्थि
तेपंकजादिपदस्यलक्षणेवाभ्युपगंतव्या नतुरूढियोगोवा नचप्रथमसंयोगरूढिभ्यांस्वार्थोपस्थानेपश्चान्ना
भिकमलाद्यन्वयार्थविरुद्धवृत्तिमूर्कीभावेतरितरवृत्त्यैवस्वतंत्रपद्मत्वाद्युपस्थितेराकांक्षादिसंभवान्नतदर्थमि

॥इ॰ वार्ति॰॥ इलक्षणेतिवाच्यं॥केवलरूपादिनास्वतंत्रपदत्वाद्व्युत्पत्त्यर्थंशब्दस्युपुनरनुसंधानकल्पनागौरवापत्तेः॥लक्षणा
॥२॥ पक्षेतुनायंशेषोयोगरूढइ॥पंकजनिकर्दत्वसंबलितपदत्वरूपविशिष्टोपस्थितेर्विशेषणविशिष्टान्यतरोपस्थिति
लक्षणेद्वारत्वेनद्वारेसतिद्वारिणःपुनरपेक्षणात्॥नचशाक्योपस्थितिर्लक्षणायामिवशक्योपस्थित्यंतूरोपद्वारमयेन
रूढ्यादिनास्वतंत्रपदोपस्थितिरपिपुनरनुसंधानंनकल्पतेत्याहुः॥इत्यभिधात्रिविधानिरूपिता॥ साधनेक-
शक्तिकस्यशब्दस्यसंयोगादेर्नियम्यते॥तथाहुः॥संयोगोविप्रयोगश्चसाहचर्यंविरोधिता॥अर्थःप्रकरणंलिंगंशब्दस्या
न्यस्यसंनिधिः॥सामर्थ्यमौचितीदेशःकालोव्यक्तिःस्वरादयः॥शब्दार्थस्यानवच्छेदेविशेषस्मृतिहेतवइति॥अर्थःप्रयो
जनं॥प्रकरणेवक्तृश्रोतृवस्थितालिंगंप्रयुक्तनानार्थपदवाच्यांतरव्यावृत्तोधर्मः॥शब्दस्यान्यस्यसन्निधिर्नानार्थ
पदैकवाच्यसंसर्ग्यर्थानूरवादिपदसमभिव्याहारासामर्थ्याद्वारणत्वं॥औचितीं॥अहेतव्यक्तिःस्त्रीपुंनपुंस
कं॥शेषंप्रसिद्धं॥तत्र॥शंखचक्रधरोहरिः॥इत्यत्रशंखचक्रसंयोगेनहरिशब्दस्यभगवत्यभिधानियम्यते॥अ
त्रशंखचक्रोहरिरित्यत्रतद्वियोगेना॥रामलक्ष्मणावित्यत्ररामपदस्यलक्ष्मणसाहचर्याद्रघुपुंगवे॥छायातपो
वित्यत्रछायापदस्यातपेनमहानवस्थानविरोधादनातपे॥रामरावणयोरित्यत्ररावणेनसहवध्यघातकभाव
विरोधाद्रामपदस्यचंद्रे॥यत्तुरामार्जुनयोर्वध्यघातकभावविरोधाद्भार्गवकार्तवीर्ययोरभिधानियम्यतइत्यु
दाहरणं॥तन्न॥रामपदस्यभार्गवेभिधानियमेसतितद्विरोधानुसंधानेनार्जुनपदस्यकार्तवीर्याभिधानियम
नं॥तस्मिंश्चसतितद्विरोधप्रतिसंबंधानिवरामपदस्येतिपरस्पराश्रयनापत्तेः॥तस्मादन्यतरपदस्यव्य
वस्थितार्थत्वेएवस्मृतिविरोधप्रतिसंबंधानात्रानर्थपदस्याभिधानियमनमितिप्रागुक्तमेवोदाहरणमनुस
र्तव्यं॥इदंतुशब्दांतरसन्निधेरुदाहरणंभविष्यति॥हरिंमोक्षायभजतेत्यत्रमोक्षरूपेणार्थेनहरिशब्दस्यभ-
गवत्यभिधानियम्यते॥विवेशरामोदुर्धर्षतापसाश्रममंडलमित्यत्ररामपदस्यप्रकरणाद्रघुधीरो॥कुपितो
भूभृदित्यत्रकोपलिंगेनपर्वतेष्यादत्तेनभूभृत्पदस्यराजनिसंयोगोदाहरणेप्रसिद्धिप्राचुर्यं॥शंखादरिपदार्थी
तरेपिसंयोगाविरोधात्॥लिंगोदाहरणेतुसर्वथार्थांतरव्यावृत्तिरितिभेदः॥निषधंपश्यभूभृतमित्यत्रजनपदवि
रोधसाधारणस्यनिषधपदस्यपर्वतवाचिभूभृत्पदसन्निधानात्पर्वतविशेषेनियम्यतोभूभृत्पदस्यचराजसाधा

॥२॥

रणस्यपर्वतविशेषवाचिनिषधपदसंन्निधिनात्पर्वतेनचान्योन्याश्रयः॥नह्यत्रसमभिव्याहृतशब्देनतदर्थप्रतिपा
दनमभिधानियमनायापेक्ष्यते॥किंतुस्वार्थेनगृहीतसंसर्गेर्थेव्युत्पन्नोयःशब्दस्तत्समभिव्याहारमात्रंसंबध्यंत
रस्मरणायापेक्ष्यतेनतुतद्दर्शनानंतरंतत्संबंधस्मरणमपीतियथानान्योन्याश्रयः॥तथेहापिनिषधभूभृत्पद
योरभिधानियमनायगृहीतस्वस्वार्थव्युत्पत्तिकभूभृन्निषधशब्दसमभिव्याहारमात्रमपेक्ष्यतइतितनदर्थप्र
तिपादनस्यानपेक्षणान्नान्योन्याश्रयः॥नचैवंशंखचक्रधरोहरिरित्यादावपिशंखचक्रादिशब्दांतरसन्नि-
धिनैवाभिधानियमनंभविष्यतीतिव्यर्थंपृथक्संयोगादुदाहरणमितिचमैवं॥तत्रशंखचक्रादिशब्दानांनिय-
तार्थतयाश्रवणमात्रादर्थप्रतिपादकत्वेनतत्प्रतिपादितार्थसंयोगादिभिरभिधानियमनसंभवात्॥शब्दांत
रसन्निधिरपितत्रास्तीतिचेत्॥अस्तु॥तथापिहरिशब्दाद्यभिधानियमनसमर्थेतदर्थसंयोगरूपसन्निहित
संबंधेनांतरंगेथशंखचक्रादावुपस्थितेतत्रापिवाचकतयाव्यवहितसंबंधेनबहिरंगशब्दांतरसन्निधिर्नोदा
हरणत्वमर्हति॥अतोयत्रनिषधंपश्यभूभृतमित्यादावुभयस्यनानार्थतयानकस्याप्यर्थस्यप्रथममुपस्थि
तिस्तत्रेषबहिरंगस्यापितस्यनियामकत्वेनोदाहरणमितिनकश्चित्संकरः॥यत्तुनियतार्थशब्दसामानाधिक
रण्यंशब्दांतरस्यसन्निधिः॥तेनचदेवस्त्रिपुरारिरित्यत्रदेवशब्दस्यशंकरेनियमनं॥तत्रत्रिपुरशब्दस्यनियता
र्थत्वादिति॥तदयुक्तं॥समभिव्याहृतशब्दस्यनियतार्थत्वेतत्प्रतिपादितलिंगादिनेवतन्नियमनात्॥अन्यथालिं
गादुदाहरणेपिशब्दांतरसन्निधेरेवनियामकत्वापत्तेः॥नचसामानाधिकरण्येशब्दांतरसन्निधिर्वैयधिकरण्ये
भूभृतःकोपइत्यादिरूपंलिंगादिकमितिभेदकथनमुभयत्रशब्दप्रतिपादितलिंगादेरेवनियामकत्वेनास्यभेद
कथनस्यपरिभाषामात्रत्वात्॥व्यालोदानेनराजतेइत्यत्रव्यालदानयोरुभयोरप्यनियतार्थत्वेपिवैयधिकर-
ण्येपिपरस्परसमभिव्याहारेणदुष्टगजमदजलयोरभिधानियमनस्यसर्वानुभवसिद्धत्वेनावश्यसंग्राह्यत्वात्तद
संग्रहेणलक्षणकथनस्यात्यंतायुक्तत्वाच्च॥तस्मादस्माद्धेतोरेवशब्दांतरसन्निधेः प्रक्रियादर्शनाच्च॥मधुनामंतःको
किलपदकारणत्वरूपेणसामर्थ्येनवसंतेमधुशब्दस्याभिधानियम्यते॥भजतहरिंभवतापखिन्नाइत्यत्रभवताप

हरणोचित्येनहरिपदस्यलक्ष्मीरमणोअर्थोदाहरणेचतुर्थ्याकार्यत्वनिर्देशः॥सामर्थ्योदाहरणेतृतीययाकारणत्वनिर्देशः॥औचित्योदाहरणेतुभयनिर्देशोपियोग्यतामात्रेणसमभिव्याहरल्लभ्यकार्यकारणभावागमइतिभेदः॥सीणं हरिःशेतेइत्यत्रदेशेनबलयेतिष्ठतिहरिरित्यत्रकालेनचगरुडध्वजेहरिपदस्याभिधानियम्यते॥मिश्रोभातीत्यत्र पुंव्यक्त्याश्रयात्पनो॥सुहृद्दाचिनोनपुंसकत्वात्तिस्रएधसोऽङ्गस्योपसदोद्वादशाहीनस्येतिश्रुतावहीनपदस्यमध्योदात्त स्वरेणाहर्गणोहर्गणेद्वादशाख्यऋतुविशेषे॥हीनोभवतीतिनञ्समासेसत्यहीनपदस्याद्युदात्तत्वात्॥आदिशब्देनाभिनयादिविवक्षितार्थरूपिप्रदर्शकोहस्तादिव्यापारः॥उपदेशोविवक्षितार्थस्यशृंगग्राहिकयानिर्देशः पुरदर्शितसन्निवेशोमरुत्पराभूतसरोजकोशो॥इमाविपंतोपुनरेषनीतेकुचोकियंतोपरुतोभवेता॥इत्यत्र स्वकालस्तनपरिमाणप्रदर्शकहस्तव्यापारेणइयत्पदस्यपरिमाणविशेषे॥इतःसदेत्यपदस्यपरिमाणविशेषे इतःसदेत्यःप्राप्तश्रीर्नतएधार्हतिक्षयं॥विषवृक्षोपिसंवर्ध्यस्वयंछेत्तुमसांप्रतं॥इत्यत्रइतइतिस्वात्मनिर्देशे नतस्यवक्तरिपरमेणिन्यभिधानियम्यते॥यत्रत्वनेकशक्तिस्वशब्दस्याभिधानियामकमनेकत्रप्रविष्टम र्थांतरमेवाभिधत्ते॥तत्रनान्यस्मिन्नभिधानियम्यते॥यथा॥येनध्वस्तमनोभवेनबलिजित्कायःपुरास्त्रीकृतोयश्चोद्धृत्तभुजंगहारवलयोगंगांचयोधारयत्॥यस्याङ्कःशशिमाच्छिरोहरइतिस्तुत्यंचनामामराःपायात्सस्वयंमधुक्षयकरस्त्वांसर्वदोमाधवः॥शिवकेशवयोरपिस्तुत्यतयात्रकरणमविशिष्टं॥अतोध्वस्तमनोभवेननाशितमन्मथेनबलिजित्कायःविष्टोर्विग्नहःपुरस्त्रस्तांनीतोयश्चोद्धृत्तविशेषवासुकिमुखभृतिनागराजसंपादितहारवलयःकृत्योयश्चगंगामुधारणात्॥यस्यशिरःशशिमदाङ्कुरमराःस्तुत्यंनामचहरइत्याङ्कः॥अंधकासुरक्षयकरः॥सउमाधवस्त्वांसर्वदापायादि॥अभवेननिःसंसारेणयेनअनःशकटंध्वस्तंयेनबलिजिदस्यकायःपुरा मृतमथनेस्त्रीत्वंनीतोयश्चोद्धृत्तभुजंगंकालीयंहतवान्॥रवेराद्यत्नमणिलयस्तद्रूपापत्तिरस्यतिरवलयः उद्धृत्तभुजंगाङ्कतदारवलयंचक्रमस्योपरइति॥अंधकानांराज्ञांक्षयकृतिर्वासकृतः॥सर्वदोमाधवस्त्वांपायादि- ॥३॥

तिवार्थद्वयेप्यभिधेयव्यापारः॥अतएवात्रश्लेषोलंकारः॥ननुचयत्रानेकत्रप्रकरणाद्यविशिष्टंतत्रभवत्यनेकत्रापि अभिधाव्यापारः॥यत्रप्रकरणस्यकविदर्थेधस्थितत्वेप्याकरणिकंशक्त्यंतरंप्रतीयतेतत्रकागतिः॥यथाजसा वुरुह्यमारूढः कांतिमान्वक्त्रमंडलः॥राजाहरतिलोकस्यहृदयंमृदुभिःकरैरितिचंद्रोदयवर्णनप्रस्तावोअत्रस्थाप्या करणिकोभूपतिरभ्युदयादितिविशिष्टःप्रतीयते॥अत्रप्रांचः॥तत्रशब्दशक्तिमूलोव्यंजनाव्यापारएवशरणं॥ग त्यंतराभावात्॥नहितत्राभिधासंभवतितस्याःप्रकरणंचेदेनियमितत्वात्॥नापिलक्षणा॥मुख्यार्थबाधाद्यभावात्॥नवाभिधायाइवव्यंजनस्यापिप्रकरणेननियंत्रणेननियंत्रणेतेनापितन्निर्धारइतिवाच्यं॥तस्यधर्मिग्राहकमानेनतद्नियम्यतयेवसिद्धेः॥अतकाव्यात्तन्निविष्टस्याप्याकरणिकवदर्थनियताभिधाव्यापारस्याप्यसम्यक्पदार्थांतरप्रत्ययहेतोः॥पदस्यहेत्वयं॥अन्यथातत्राभिदर्थनियताभिधाव्यापारस्याप्यसम्यपदार्थांतरप्रत्ययहेतोःपदस्यहेत्वयं॥अथान्यतत्राभिधायाइवव्यंजनव्यापारस्यापिप्रकरणेननियंत्रणेनसभ्यार्थान्नप्रत्ययसंभवात्॥यस्याननंयोनिरुदारधाचामित्यादावरलीलदोषोनस्यात्॥तस्मात्संयोगादिभिरभिधास्तंखलितायत्ररूढतामतिअर्थांतरावगमनेव्यंजनमेवक्षमंतत्रेति॥वयंतुनैवमः॥असाधुद्यमारूढइत्यादौप्राकरणिकेर्थेप्राकरणिकादप्राकरणिकेपिराजकयणुत्वादिशब्दानांपरस्परान्वययोग्यनृपतितद्भृत्यवनदेशादिवाचकानांसमभिव्याहाररूपमभिधानियामकमस्तीत्यर्थद्वयस्यापिप्राकरणिकत्वइवप्राकरणिकाप्राकरणिकरूपत्वेप्युभयत्राभिधेयव्यापारः॥यथोक्तसमभिव्याहारेणानानार्थःशब्देभ्योर्थप्रत्ययस्यसर्वसिद्धत्वेनतस्यतदनापिनियामकत्वमास्थेयमेव॥वस्तुतोयमेवशब्दांतरसन्निधिरित्युक्तं॥नचाप्राकरणिकेउक्तरूपशब्दांतरसन्निधिमात्रंप्राकरणिकेतुतच्चप्रकरणंचेतिनियामकाधिक्यात्तत्रैवाभिधास्यादितिवाच्यं॥प्रकरणादिनादानामभिधानियामकत्वंहिनानार्थशब्दजन्यशक्त्यस्मृतौतेषामन्यतमकारणत्वं॥यथोक्तं॥शब्दार्थस्यानवच्छेदेविशेषस्मृतिहेतवइति॥तथाचतेषुकस्यचिदपिसमाधानेस्मृतिसामग्रीषुफलेवतिकिंतद्वाङ्मात्येन॥अत्रैकमेवपदंनानार्थंप्राकरणि

कल्पितात्पर्यवत्॥यथा॥करोतिकंसादिर्महीकृतांवधाज्जनोमृगानामेवयत्नवस्तवांहरेर्हिरण्याक्षपुरःसरा
सुरद्विषद्विषःप्रत्युतसातिरस्क्रियाइत्यत्रहरिपदं॥तत्रापिसमधिव्याहृतद्विषदप्रतीतगजारिरोधादिकमप्रा
करणिकेसिंहेऽभिधानियामकमस्त्येव॥यत्रतुयस्यामनयोर्निरूढारवाचामित्यादौचरलीलेनेवतादृशं-
नियामकंतत्रापिबुभुत्सितार्थव्यासक्तस्यमनसस्तुलंघासह्यंदुर्गंधादौप्रवृत्तिवत्प्रकरणनियंत्रितस्या
पिशब्दस्यतदुल्लंघ्यविषयस्याभाव्यादरलीलेप्रवृत्तिरितिनकापिशक्तिर्विषयेव्यक्तिरंगीकरणीया॥यदित्वे
वंविधानिनियामकानिनाद्रियेरन्॥तदात्रस्थलेषुव्यंजनव्यापारोपिदुर्गमः॥तथाहि॥प्रकरणादिकमु
ल्लंघ्यव्यंजनव्यापारेणाव्यर्थांतरप्रत्ययोनसर्वत्रवक्तुंशक्यते॥प्रकरणादीनामभिधानियामकत्व-
कल्पनस्यव्यर्थापत्तेः॥तद्हिनादृष्टार्थंकिंतुसिंधवमानयेत्यादावेकार्थमात्रपरत्वानार्थशब्दस्थलेअर्थ-
विशेषस्मृतिव्यवस्थार्थं॥यदिव्यंजनव्यापारेणार्थान्निश्चयःस्यात्तदाकथमेषांसिध्येत्॥नह्यभिम
तानभिमतक्षेत्रेसाधारण्यंजलाश्रयस्याभिमतक्षेत्रगामिनीमेकांकुल्यांविधायानभिमतक्षेत्रगा
मिनःकुल्यांतरस्यापिकल्पनेजलस्याभिमतक्षेत्रेकगामित्वव्यवस्थाकृताभवति॥तथाच॥यत्रकव-
यितुश्चमत्कारायाप्राकरणिकेव्यर्थसादृश्यंयत्रराशब्दोदोषस्तत्रैवव्यंजनव्यापारोन्मेषोनसर्वत्रेति
व्यवस्थासिद्ध्येतत्रतत्रनियामकान्यस्मदुक्तानिअन्यादृशानिवावश्यमाहर्त्तव्यानि॥तेषांचाभिधा
नियामकत्वमेववक्तुंशक्यमितिव्यर्थस्तत्रव्यक्तिकल्पनापरिश्रमः॥दुर्वारश्चतत्रव्यक्तिवादि—मते-
व्यभिधाव्यापारः॥तथाहि॥यदिशक्तिरभिधानिर्वाविधादमरूयेवाप्रकरणिकेपिसा॥यदिचकाव्यप्र
काशोक्तरीत्याशक्यार्थप्रतिपादकत्वमभिधात्तर्हिशब्दव्यापारः॥सोप्यस्त्येव॥नहितत्रप्राकरणि
कशक्यप्रतिपत्तेःशब्दान्यज्जनकंशक्तिग्रहमपेक्ष्यतत्प्रतिपादकत्वमभिधेतिचेत्॥अप्राकरणिकोर्थ ॥४॥
स्तत्राग्रहीतशक्तिकस्याभिधाज्ञाकिंनप्रतीचतेयेवसातत्रनस्यात्॥ननुशक्त्यासोक्षात्प्रतिपादकत्व

मभिधासाक्षादित्यादिविशेषणेमुख्यार्थशक्तिग्रहमपेक्ष्यतत्प्रतिपादनव्यवधानेनसंबंध्यर्थांतरप्रतिपादनरू
पायालक्षणायाअप्यभिधात्वप्रसंगात्॥तथाचप्रागेवानुवर्तमानेनप्रकरणेनतत्प्रमेयोपस्थानेनाप्रभावी
तिसंव्यवधानेनार्थांतरप्रतिपादनंनाभिधेतिचेत्तनतद्विषयशक्तिग्रहमपेक्ष्यतत्प्रतिपादनमभिधेतिलक्षणं
विनैवसाक्षात्त्वविशेषणं॥अनतिप्रसंगात्॥तत्पदरूपेणापदभंगकृतपादांतररूपेणवाअर्थांतरप्रतिपादनव्य
वधानाभावरूपसाक्षात्त्वविशेषणस्यगुरुत्वात्तथाविशेषणेयेनध्वस्तमनोभवेनेत्यादावस्फुटपदसन्निधि
स्तथाशशिनशिरोहरःअंधकक्षयकरःइत्यनयोरप्रयुक्तनिहितार्थत्वेनाप्रसिद्धतयाचविलंबेनप्रतियंतिरि
तिसर्वंसिद्ध्येतत्राभिधाविषयेपितद्भावापत्तेःप्रकृताप्रकृताभयपरेयत्रोभयप्रकृतप्रसिद्धतरंप्रकृते
प्रसिद्धतरंपदंतत्रप्रसिद्धिप्राचुर्येणाप्रकृतार्थप्रतीतिरेवप्राथमिकत्वेनाप्रकृतेभिधा॥प्रकृतेवैपरीत्यापा
त्तेश्चप्रकरणमुल्लंघ्यापिप्रसिद्धतरार्थस्यैवप्रथमस्मृतेः॥अतएवहृद्यार्थमप्रसिद्ध्यर्थंप्रयुक्तंनिहितार्थ
कमित्युक्तलक्षणस्यनिहितार्थस्यकाव्यदोषमुपगम्यते॥प्रसिद्धतराप्रकृतार्थप्रतीतिर्व्यवधानात्॥नच्च
निहितार्थस्यदोषत्वात्तत्प्रयोगोर्थद्वयविवक्षास्थलेपिकाव्येनसंभवतीतिवाच्यं॥श्लेषयमकादिषुतेर्दो
षत्वस्यापादितत्वात्॥अंधकक्षयकरः॥राजाहरतिलोकस्यराजाराजार्चितांघ्रि॥यस्यचूडामणिश्चंमित्या
दिदर्शनाच्च॥तस्माच्छब्दस्यार्थेपियोगितत्प्रत्यासत्तिरूपधर्मभेदेनशक्तिप्रयोजकोननुतद्भेदाभावः॥प्र
तिपादनेगतसाक्षात्त्वव्यवहितत्वभेदेसत्यपिशक्तिशक्यसंबंधरूपप्रतिपाद्यप्रत्यासत्तिभेदेनाभिधा
लक्षणयोर्भेददर्शनात्॥तद्भेदाभावेप्रसिद्धार्थगोचरशब्दश्लेषस्थलेलक्षितलक्षणास्थलेव्यंग्यस्थलेचा-
र्थद्वयप्रतीत्योःसाक्षात्त्वव्यवहितत्वभेदेसत्यप्यभिधालक्षणाव्यक्त्यतिरिक्तवृत्त्यदर्शनाच्चेत्यप्रयोजक-
स्याव्यवस्थापादकस्यचसाक्षात्त्वविशेषणस्यायोगात्तद्विषयशक्तिग्रहमपेक्ष्यतत्प्रतिपादकत्वमभिधेति॥
अप्रकृतेप्यर्थेभिधाव्यापारोदुर्धरः॥नैयायिकास्तुप्रसिद्धिप्राचुर्येसतिप्रकरणादिशून्यस्याप्यर्थस्यस्मृतेः
प्रसिद्ध्यभावेप्रकरणादिमतोप्यस्मृतश्चप्रकरणादिकंनाभिधानियामकंशक्तिग्रहसंस्कारपाटवमात्रनिय

॥ इ. वा. ॥ ॥५॥

म्यत्वात्तस्याः॥ किंतु लिंगविधायातात्पर्यग्राहकं॥ अतएवहरिरस्तीत्यनारभ्यवादश्रवणेपिहरिशब्दस्यार्थमा
भिलेंद्रचंद्रचंद्रादयोर्थइत्यवधार्यतएववक्तुःकृतात्पर्यमितिनावधार्येतइत्याकृतइत्याद्यानुपक्रथंचिदपिप्र
करणादिनाशक्यशंकं॥तस्मात्प्रस्तुताप्रस्तुतोभयवाच्यार्थाभिधेवृत्तिः॥तदुपस्थितेषुचपदार्थेषुकांस्यादिस
दृकारिवशादुभयविधवाक्यार्थप्रत्ययइत्यप्रस्तुतविषयेनापाक्यर्थत्रातीतयेपिनव्यक्तिरुपगंतव्या॥यत्तु
वाचामप्रस्तुतेशक्तिमूलव्यंजनवृत्त्याभिधानंतदप्रस्तुतार्थमूलकेयथोदयमारुढइत्यादिविशिष्टपृथि
वीपतिः॥स्वत्यैर्ग्राह्यधनेलोकस्यहृदयंव्यंजयंतिएवंतथाभूतश्चंद्रमामृडलेःकिरणोत्यादिरूपेणप्रती
यमानेउपपाद्यथालंकारेतदवश्यंभावदर्शनाभिप्रायेण॥ननुतत्रापिवस्तुतोव्यंजनव्यापारोस्ती
त्यभिप्रायेण॥आछादितायतदिगंबरमुच्चकैर्गामाक्रम्यचस्थितमुदग्रविशालशृंगं॥मूर्ध्निस्खलंतु
हिनदीधितिकोटिमेनमुद्दीक्ष्यकोनभुविविस्मयतेनगेशमित्यादीनांशब्दशक्तिमूलस्यालंकारध्वनेर
वोदाहरणत्वेनतेरपिलिखित्वात्॥उपोढरागेणविलोलतारकंतथागृहीतंशशिनानिशामुखमिति
श्लेशपायोदितविशेषणसाधारणनिमित्तसमासोक्त्यलंकारोदाहरणेरागादिशब्दानामप्रस्तुतेष्य
भिधास्तेरश्लेषव्यवहारणस्फुटीकरणाच्च॥नचात्रस्वतोप्रस्तुतयोरपिकामिनोःप्रस्तुतशशिनिशा
यश्लेदकत्वेनान्वयात्तत्रतयोःसंबंधेप्रकरणसंभवइतिवाच्यं॥विशेषणसाम्यादप्रस्तुतस्यगम्यत्वे
समासोक्तिरितिलक्षणानुरोधेनाप्रस्तुतप्रतिपत्तेर्विशेषणसाम्याधीनत्वेनाप्रस्तुतस्यप्रकरणसंबंधा
वगमात्रागेवतद्विशेषणद्वाराभिधायावाच्यत्वात्प्रस्तुतोपयोगानुपपत्तेश्चप्रकरण
संबंधस्येहापिसद्भावाच्च॥सर्वथाप्रस्तुतासंबंधस्याप्रस्तुतस्यकाव्यिकविधायांवाच्यत्वात्प्रस्तु
तोपक्षागोचरत्वाभावाच्च॥नन्वेवंशब्दशक्तिमूलस्यालंकारध्वनेराछादितायतदिगंबरमित्यादुदाहर
णमत्रेपितन्मूलोवस्तुध्वनिर्व्यपदेष्टव्यतांनिरलंकारेप्रस्तुतार्थएववस्तुध्वनेरुदाहरणीयत्वात्॥तत्रेवत्वे
याभिधार्गीकारादितिचेन्नायत्राप्रस्तुतेर्थेभिधेयेधप्रतिपाद्यमानेतन्मूलमनभिधेयंवस्तुप्रतीयतेतत्रत

॥ ५ ॥

तरंगीकारादितियथा॥शनिरशनिश्चेतमुच्चैर्निहंतिकुप्यसिनरेंद्रयस्मेत्वमिति अत्रह्यशनिशब्देन प्रस्तुता
दन्यस्मिन्समभिव्याहृतशनिरूपेप्यर्थेभिधेयेधप्रतिपाद्यमानेविरुद्धापित्वदनुवर्तमानार्थमेकंकार्यकु
रुतइत्युपश्लोक्यस्वप्रतापातिशयःप्रतीयतेइत्थमेवचमार्गानेरपिशब्दशक्तिमूलोवस्तुध्वनिरुदाहृतः मनुष्य
मिमरतिमलसहरयातांमलयंमूर्खांतमः शरीरसादं मरणंचजलदभुजगजंप्रसह्यकुरुतेविषंवियोगिनीना
मित्यत्रविषपदेनाप्रस्तुतंगरलंध्वन्यतेव्यस्यजलदएवभुजगइतिपकस्यसिद्धेरितिवाच्यसिध्यंगगुणी
भूतव्यंग्यमुदाहरतामन्मथाचार्येणाप्रस्तुतेशक्येपिशब्दशक्तिमूलोवस्तुध्वनिरुक्तः सत्यं अप्रस्तुतार्थप्र
तीतिमूलतयाप्रतीयमानयोर्वस्त्वलंकारयोर्व्यक्तवस्थंभावदर्शनायाश्रितमप्रस्तुतार्थेपिव्यक्तिरितिप्रो
ह्यवादमात्रमवलंब्यतत्प्रवृत्तमितिनात्राभिनिवेशःकार्यः नन्वेवंवस्तुतार्थपर्यालोचनालभ्ययारेव
प्रस्तुतास्त्वलंकारयोर्व्यक्तयुपगमेतत्रार्थशक्तिमूलेवर्काकिंनभवेदितिपृथगर्थशक्तिमूलध्वनेः शब्दमूलो
नस्यादितिचेन्नैवं तथात्वेपि प्रस्तुतोभवसाधारणशब्दस्यापेक्षयाप्रस्तुतमात्रपर्यायशब्दांतरपरिहृत्य
सहिष्टुत्वेनतस्योत्तरस्यपृथगुपस्थितेरेवमन्येपि अप्रस्तुतशक्येपिव्यक्तयनुगमेसंभाविताःक्षुद्रोप
द्रवानिरसनीयाः॥ ॥इत्यप्पदीक्षितविरचितेवृत्तिवार्त्तिकमुख्यवृत्तिनिर्णयोनामप्रथमःपरिछेदः॥

॥अथलक्षणानिर्णीयते॥ ॥ सान्वमुख्यार्थसंबंधेनशब्दस्यप्रतिपादकत्वं तत्सादृश्येनप्रति
पादकत्वंतत्तयागोण्यपिलक्षणा प्रभेदएव तत्सदृशेतन्निरूपितसादृश्याधिकरणत्वपरंपरासंबंधा
सखात् नहिसाक्षात्संबंधेविशिष्टबुद्धियोग्यसंबंधेवासत्येवलक्षणेतिनिगमः चक्षुरादिर्घटनेत्यादिषुसंयुक्त
समवायादिरविशिष्टबुद्ध्ययोग्यस्यपरंपरासंबंधस्यापिप्रत्यासत्तित्वोपपत्तेः व्यतिरेकलक्षणस्थलेतन्
निरूपितविरोधाधिकरणत्वादिपरंपरासंबंधमात्रेणतादृशीनलक्षणाछन्नेश्च एतेनसादृश्यनसंबंधइति
गोर्णालक्षणातोभिन्ना विशिष्टधीयोग्यस्यैवसंबंधत्वात् संयोगेसतिदांडीदेवदत्तइतिवत्सत्यपिसादृश्ये
सिंहवान्देवदत्तइतिविशिष्टबुद्धेरदर्शनादितिनिरस्तं विशिष्टधीनियामकपरंपरासंबंधमात्रस्यप्रत्यासत्ति

डॉक्टर भाऊ दाजी MEMORIAL DR. BHAU DAJI

स्योपपत्तेस्तथतालक्षणात्क्वचिच्छब्देश्वदर्शितत्वात् तस्मात्सादृश्यगर्भतदन्यसंबंधनिमित्तत्वयागोणशुद्धान्वीतलक्षणाए
वद्वैविध्यं इयंचद्विविधापिलक्षणाप्रत्येकंद्विविधा रूढिलक्षणाफललक्षणाच्च रूढितुल्यतयानिरूढानिरूढलक्षणा
विवक्षितार्थांतरद्योतनफलाफललक्षणा आद्यायथा लावण्यसागरभुविप्रणयंविशोषादुग्धांबुराशिदुहितुस्त
यतर्कयामि यातांथिभर्षिवपुषानिखिलैःप्रतीकैरन्यांतुकेवलमधोक्षजवक्षसैव अत्रलावण्यशब्दस्यलक्षण
त्वानिनोहृदयंगमत्वसादृश्यात्सुखमाविशेषेरूढिलक्षणा एवमालेख्यगजादीगजादिशब्दस्यापिरूढिलक्ष
णानुधेया इदंगोण्याहरणं शुद्धायथा कृष्णाहिरेफावलिनीलकंठप्रसार्यशारवाभुजमाम्रवल्ल्री रुतोपगद्य
फलकर्णकजितेरनामयंपृच्छतिदक्षिणालं अभ्रहिरेफशब्दस्यहारेफोयस्यतिच्युत्यत्याभ्रमरशब्दवृत्तेस्तद्वा
च्येरूढिलक्षणा एवंक्षगादिशब्दानात्वगिंद्रियादिष्वपिशुद्धारूढिलक्षणाद्रष्टव्या जहल्लक्षणाजहल्लक्षणाजह
दजहल्लक्षणासारोपासाध्यवसानाच्चशुद्धागोणीचेत्येवंसप्तविधाफललक्षणा जहल्लक्षणायथा त्वत्पादपद्म
सुपमानुरुतिस्माणिप्रवालपदभाजिविभूषणानि वल्काहृताधृतसटाःसुरदीर्घिकायांकल्पद्रुमाःकतिगिरी
शतपश्चरंति अत्रसुरदीर्घिकापदस्यकल्पद्रुमाधिकरणत्वयोग्येवृत्तीरलक्षणा मुख्यार्थस्यतदधिकरण-
त्वेनान्वयाभावाज्जहज्जहल्लक्षणा कल्पद्रुमाणांतपश्चर्योत्थसोपस्कारकीर्तीरस्यातिशयितपावनत्वद्योत
नंफलं एवंगंगायांघोषइतिप्रसिद्धोदाहरणमप्यनुसंधेयं तत्रगोरक्षाभिनःप्रीतयेतीरस्याधिकारोत्यद्योत-
नफलं व्यतिरेकलक्षणापिजहल्लक्षणाप्रभेदएव यथाउपरुतंबकुलंतत्रकिमुच्यतेसुजनग्रथितामवनापरं
विदधरीदृशमेवसदासखेसुखितमास्वतनःसरदांशतं अत्रापकारिण्यान्वयायोग्यउपरुतादिपदैःस्वार्थ
विरुद्धंलक्ष्यते त्वयापकारेकृतेपिमयेवंप्रियमेधोव्यतरतिस्वसाधुत्वद्योतनंफलं अजहल्लक्षणायथा कुंती
प्रविशंतियष्टयश्चेति अत्रकुंतादिपदस्यतद्वत्पुरुषेवृत्तिलक्षणा कुंतादेरपिपुरुषसाहित्येनप्रवेशक्रियान्वया
दजहल्लक्षणा तेषांनिर्दयमहर्तृत्वादिद्योतनंफलं ग्रामेकदेशदाहेसतिग्रामोदग्धःपुच्छिनंधनमित्यादिप्रयो
गेग्रामादिपदस्यस्वार्थैकदेशपरित्यागेनतदेकदेशवृत्तेर्जहदजहल्लक्षणा दग्धपुच्छस्वादिद्योतनफलं सारोपा
यथा नाथत्वदीयमकलंकमिमंसुखेंदुमार्षीयतुष्यतिसदावसुधायतन्मे तेनैवकिंनवसुधारसगोचरोयदि

दुःफलंकमलिनीकृतमध्यभागः॥अत्रेंदुशब्दस्यमुखेलावण्यादिसादृश्याद्गोणसारोपलक्षणा॥तद्रूपःप्रतीतिःफलं॥र
वंगोवाहीकःमुखंकमलमित्यादिष्वासेपिगोणसारोपलक्षणाद्रष्टव्या॥गोणसाध्यवसानंयथा॥नाभेरभूत्तवचतु-
र्भुजनांतरिक्षंयन्नाभिरेवयदुनेतरिपंततोभूत्॥अन्योन्यसंश्रयपराकृतिरूपितंयदाहश्रुतिस्तदविमृश्यकिमर्थं
तत्वं॥अभांतरिक्षेपदस्यभगवान्वलग्नेसूक्ष्मत्वसादृश्याद्गोणसाध्यवसायलक्षणासर्वथाभेदप्रतिपत्तिःफलं॥
विषयस्यविषयिभेदेनापकृतेनतद्रूपोपरक्तताप्रतीतिस्ताद्रूप्यप्रतीतिर्विषयस्यविषयिणेवभेदेप्रतीतिः॥सर्व
थेवाभेदप्रतिपत्तिरितिसारोपसाध्यवसायलक्षणाफलयोर्भेदः॥विषयविषयिवाचकयोर्द्वयोरपिनिर्देशआ
रोपः॥विषयिपदत्रयस्यविषयिलक्षणेकतथानिर्देशोध्यवसायइत्यारोपाध्यवसानयोर्भेदः॥ननुसारोपलक्षणो
दाहरणेमुखेंदुरित्यादाविंद्रादिपदस्यमुखादीनमुखत्वादिनालक्षणामुखादिपदस्यापिसत्वेनपौनरुक्त्यापत्तेः॥
नापिइंदुगतलावण्यादिगुणेन॥अन्यगुणस्यान्यत्रप्रवृत्तिनिमित्तत्वायोगात्॥नापिमुखगतलावण्यादिमुखे
नामुख्यार्थसंबंधरहितगुणमुखेनलक्षणायोयोगात्॥मैवं॥मुखचंद्रोदयगतलावण्यसामान्यादिमुखेन
लक्षणोपगमेदोषद्वयस्याप्यसंस्पर्शात्॥इदमेवाभिसंधायोक्तं॥द्वयैः॥लक्ष्यमाणगुणैर्योगाद्गुणैरिष्टातुगो-
णतेति॥शुद्धसारोपलक्षणायथा॥आपादमाचिकुरभारमशेषमंगमानंदसारमरविंददृशामसामं॥अंत
र्ममस्फुरतुसंततमंतरात्मन्नंभोजनलोचनतवाश्रितहस्तशेलं॥अत्रभगवद्गेघानंदकारित्वेनामंदपद-
स्यसारोपलक्षणा॥आनंदकरणेइतरवैलक्षण्यद्योतनंफलं॥आनंदकारिणिविषयिनिगरणेनानन्वोदय-
मितिप्रयोगेसाध्यवसायलक्षणा॥आनंदाव्यभिचारद्योतनंफलं॥एवंशुद्धापंचविधा॥गोणीहिविधेति
सप्तविधाफललक्षणा॥ननुगोण्यामपिजहल्लक्षणाभेदोसंभवतः॥मुखंकमलंगोवाहीकइत्यादौजहल्ल
क्षणातावत्स्फुटैव॥अजहल्लक्षणापिगोवाहीकोभयविषयेगावएतेसमानीयंतामित्यादौदृश्यते॥अतः
कथंगोणीहिविधेधा॥उच्यते॥मुख्यार्थसादृश्येभलक्षणाहिगोणी॥नचतत्रैवतत्सादृश्यमस्तियेनमुख्यपि
गोणीवृत्तीःस्यात्॥शुद्धात्वजहल्लक्षणा॥कुंताःप्रविशंतिइत्यादौविशेषणवाचिनाविशिष्टसंभवति॥विशि

ष्टविशेषणयोरेकपदेश्यैकदेशभावरूपसंबंधत्वात्॥अतोगावणतेसमानीयंतामित्यावभिधालक्षणाभ्यामे
वर्थद्वयप्रतिपादनं॥गंगायांजलंघोषश्चतिष्ठतीत्यत्रचेतिनगोण्यांजहल्लक्षणाभेदसंभवः॥तस्मात्सत्येवल
क्षणाभेदाइति॥इत्थमयंविरंतनतेःप्रदर्शितोलक्षणाविभागइति॥अत्रेदंप्रतिभासते शुद्धासुसाध्यवसायल
क्षणाभेदकथनमयुक्तं॥परार्थस्वसप्पूर्णांस्वाविशेषणतस्याजहल्लक्षणानातिरेकात्॥नहितद्विशेषेपिसा
शेपलक्षणायांविषयवाचकसामानाधिकरस्यरूतवैचित्र्यवद्हवैचित्र्यांतरमस्तियेनतद्देवजहल्लणांतः
पृथगुद्धाक्रियेत॥ननुकार्यकारणसार्वसंबंधेसतितिस्यतएवततःपृथक्कमसु॥कार्यकारणभावात्तिक्तेनगंगा
तीरादिगतयोगादिसंबंधेनसत्तौजहल्लक्षणेत्यसंकरोपपत्तेः॥मेवं॥राजकीयःपुरुषोराजा॥इंद्रार्थास्थू-
णाइंद्रः॥अतस्तायाःतस्या॥अग्नहस्तोयंहस्तइतिस्वस्वामिभावतादृश्यतात्कर्मावयवावयविभावघटिका
र्यकारणभावसारोपसाध्यव्यवसायबीराकरग्रंथेषूदाहरणादाश्रयाश्रयिभावसंबंधेप्यलंकारसुधा
निधावुदाहरणाच्चविचित्र्यांतराभावेपिसत्वंचभेदमात्रेणविधांतरोपगसंबधांतरमवलंब्यायिविधांतरो
पवर्णनस्यप्रत्याख्यातुमशक्यतयासप्तविधत्वनियमासाभंजेस्यमसंगात्॥ननुसाध्यवसायलक्षणोदा
हरणेघभेदाभिव्यक्तिरस्ति॥अथमानंदः॥अयंराजेत्यावानंदराजाघभेदाभिव्यक्तिपूर्वकमेवानंदाध्यभि
चारित्वानुलंघ्यमासनत्वादिफलप्रतीतेः॥अत्रव्यंग्यवैचित्र्येणभेदोस्तिति-चेत्जहल्लक्षणोदाहरणेपिनीरे
प्रवाहाभेदाभिव्यक्तिपूर्वकमेवतत्रतऊतातिशयितशैत्यपाठनत्वादिफलप्रतीतेः॥तारस्यप्रवाहतादात्म्य
प्रतीत्यभावेतत्रप्रवाहगतातिशयिनोशैत्यादेःप्रत्ययासंभवात्॥नहीतीरेगंगासंबंधप्रयुक्ततऊतत्वाभा
धिकशैत्यादिद्योतनमेवलक्षणफलंयेनगंगासंबंधितीरत्वेनलक्षणायैवतल्लभ्यतेनाभेदाभिव्यक्तिरंगी-
क्रियते॥सत्यविमुख्येगंगातीरादिपदेस्वापत्तेश्चशब्दप्रयोगेमुख्यप्रयोगादधिलभ्यस्यलक्षणाफलत्वायोगा
त्॥काव्यसरणीलक्षणायांकाव्यशोभातिशयाधायकतयाप्यधिकंस्तोतुकामस्तस्यप्रवाहतादात्म्यप्रति
पत्त्यातऊतातिशयितयावर्णनस्यद्योतनायतस्मिन्गंगापदंप्रयुक्तेइतिदर्शनाच्च॥अतोजहल्लक्षणायामप्यभे

॥७॥

दाभिव्यक्तिरविशा॥तत्रउक्तंचकाव्यप्रकाशिकायां॥तदाहीनांगंगाशब्दप्रतिपादनेनत्वप्रतिपत्त्यैहिप्रतिविषा
दयिषितप्रयोजनसंपत्त्यभइति॥रत्नाकरेणाप्युक्तं॥स्रोतस्तीरयोरेकशब्दवाध्यत्वेनतादात्म्यप्रतीतयेस्रो
तोधर्माःशैत्यपावनत्वास्यस्तीरेप्रतीयंतइतिप्रयोजनसिद्धिरिति॥अतसाध्यवसायलक्षणायाःफलरूतोवा
नजत्वल्लक्षणातोभेदःसंभवतीतिनतदुदाहरणपार्थक्यंयुक्तं॥तथासारोपलक्षणोदाहरणेउपमानोपमेया
नुगतसाधारणधर्ममुखेनलक्षणेत्युक्तं॥तत्रसतियत्रसाधारणधर्मस्यापिपदांतरोपादानंतत्रपूर्णोपमेत्युक्त्याप
त्तेः॥यथातारामिरामपरिणाहलक्ष्मलिताभ्रतापिछमेचकसुभ्रुःशरदंतरिक्षं॥प्राच्येवदेवतवकोस्तुभभूर्ण
चंद्रःपूर्णोबिभर्तिपुरुषोत्तमकांतिरेषा॥अत्रहिवक्षोंतरिक्षयोःसाधारणःपरिणाहित्वमेचत्वाधर्मोपि
पृथगुपात्तमेवा॥उपात्तधर्मातिरिक्तधर्ममुखेनलक्षणास्तितिचिन्ना॥उपात्तमेचकत्वादिव्यतिरिक्तति
रिक्तसामान्यधर्मास्फुरणेपिसहृदयानांपरिपूर्णवाक्यार्थप्रतीतिदर्शनादुज्ज्वलत्वादिसामान्यधर्मस्य
कथितानंगत्वात्॥अतताकथयितुरत्यंतादृशस्थलेपूदात्तधर्मातिरिक्तधर्मगर्भीकारस्यभावाच्च॥ननि
हमाभूत्सारोपलक्षणा॥उरएवशरदंतरिक्षमितिमयूरव्यंसकादिसमासोपगमेहिसाभवति॥किंतूरः
शरदंतरिक्षमिवेत्युपमितसमासोस्तु॥तत्रचविग्रहवाक्यस्थोलुप्तश्चाकारः॥सादृश्यंप्रतिपादयतीं-
तिनोपमाद्योतकस्योपमेयलक्षणोस्यालंकारिकाणामभ्युपगमः॥तत्रतेलुप्तोपमाईकारादितिनक
श्चिद्दोषइतिचेन्न॥मेचकत्वादिसामान्यस्यशब्दोपात्ततयाउपमितसमासासंभवात्॥उपमितंव्या-
घ्रादिभिःसामान्याप्रयोगइतिसामान्याप्रयोगएवतत्समासानुशासनात्॥आलंकारिकैरपिसामा
न्यप्रयोगेसत्युपमाद्योतकसत्वात्॥सारोपलक्षणामूलकोरूपकालंकारः॥नरूपमालंकारइत्यभ्युपग
मात्॥उपमितसमासेसामान्यवाचकलुप्तोपमालंकारस्येवतेरुदाहरणाच्च॥सामान्यधर्मप्रयोगेप्युप
मितसमासांगीकारेहिकेवलवाचकलुप्तापितत्रोदाहृत्येत॥नन्वेवंसाधारणप्रयोगसादृश्यप्रतियोगिभू
तस्ववाच्यपरतयाउपमेयलक्षणायाअवाच्यत्वादिति-चेन्न॥तयासतिसादृश्यस्यशब्दोपात्तत्वेनोपमालं

कारस्य प्राप्त्योसारोपलक्षणायांरूपकालंकारोपलक्षणायांनोपमेत्यलंकारविभागासामंजस्यप्रसंगात्
॥नहिसादृश्यवाच्यस्वरूपोपमा॥कमलसुहन्मुखमित्यादौसुहृदादिपदेनतल्लक्षणायामप्युपमासंप्रतिनेः
॥अपिच॥पादांबुजंभवतुधोविजयायमंजुमंजारशिंजितमनोहरमंबिकायाइत्यादौपादिसंभवन्मञ्जा
रयोरिकंनिबिध्यते॥तत्रतदानुगुण्यात्पूर्वपदार्थप्रधानेनव्याघ्रादिसमासेनउपमालंकारः॥यत्रतुयस्या
निशंदिविषदश्चरणारविंदमुत्तंसयंत्यमितभक्तिभरावनम्राइत्यादावरविंदकार्यमुत्तंसनादिकंनिबध्य
ते॥तत्रतदानुगुण्याउत्तरपदार्थप्रधानेनमयूरव्यंसकादिसमासेनरूपकालंकारइतिव्यवस्थासर्वैरे
पिप्रतिपाद्यते॥नचेयंव्यवस्थाचरणारविंदमित्यादिरूपकस्थलेधरविंदादिपदानामरविंदत्वाधाकार
मपहायारुणिमसाधारणधर्ममुखेनतन्निबंधनसादृश्यमुखेनवाचरणादिलक्षकत्वेयुज्यते॥त-
थासत्युत्तरपदार्थस्यारुण्यसादृश्यगुणस्यप्राधान्यायोगेनमयूरव्यंसकादिसमाश्रयणेपिव्या
घ्रादिसमाश्रयइवपूर्वपदार्थचरणस्येवप्राधान्यापत्याउत्तंसनानुगुण्यस्यविरहतोव्यापत्तेः॥गुण
जात्योर्जातिप्राधान्यस्यनीलोत्पलादौ ------उत्तरपदार्थस्यप्राधान्यमपि॥अरविंदजातेरि
धारुण्यसादृश्यादिगुणस्योत्तंसनानुगुणत्वाभाधाच्च॥तस्मात्सारोपल ------साधारण
धर्मादिमुखेनलक्षणेत्ययुक्तं॥तथाद्रव्यप्रतीतिरत्रफलमित्ययुक्तं॥सामान्यधर्ममुखेनसाद्
------लक्षणोपगमेताद्रव्याभिव्यक्त्ययोतात्॥तथाह॥कांतिमन्मुखेचंद्रसदृशंमुखमि
त्यादिरर्थः प्रपद्यते ------भिव्यक्तिः॥कांतिमन्मुख